# Shri Ramakrishna Suprabhatam

# શ્રીરામકૃષ્ણસુપ્રભાતમ્

## Document Information

Text title : Shri Ramakrishna Suprabhatam

File name : rAmakRRiShNasuprabhAtam2.itx

Category : deities_misc, gurudev, rAmakRiShNa, suprabhAta

Location : doc_deities_misc

Author : Otturaunninammutirippada

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણસુપ્રભાતમ્

લીલા મનુષ્યો ભગવન્ ક્ષુદિરામ સૂનો
શ્રી શારદારમણ, ચન્દ્રમણી તનૂજ ।
સર્વાવતાર તિલકાયિત-પુણ્યકીર્તે
શ્રીરામકૃષ્ણ ભવતસ્તવ-સુપ્રભાતમ્ ॥ ૧॥

કાલીપદામ્બુજ સમર્ચનલાલસસ્ય
તદ્વિપ્રયોગ કઠિનવ્યસનાતુરસ્ય ।
નિઃશેષ રોમવિવરશ◌ૃતરક્તબિન્દો-
ર્મૂર્છાભિભૂતમનસસ્તવ-સુપ્રભાતમ્ ॥ ૨॥

ત્યક્તાન્નપાનશયનાદિ શરીર ધર્માન્,
શશ્વદ્ધરાતલલુણ્ઠન-કમનીયમૂર્તે ।
અમ્બાભિધાન મુખરીકૃત પુણ્યકણ્ઠ
ત્રૈલોક્ય પાવનવિભો, તવ સુપ્રભાતમ્ ॥ ૩॥

ખડ્ગેણ કણ્ઠદલનાય સમુદ્યતસ્ય
સદ્યોવિલોકિત જગજ્જનનીમુખસ્ય ।
તત્કાન્તિવીચિ કવલીકૃત વિગ્રહસ્ય
સમ્મૂર્ચ્છયા પ્રપતતસ્તવ સુપ્રભાતમ્ ॥ ૪॥

કાલીનિરન્તરનિરીક્ષણાનન્દિતસ્ય
વાતાત્મજેન પરમૈક્યમુપાગતસ્ય ।
કામોપધાવન પરસ્ય સાક્ષાત્-
કારાનુરઞ્જિતધિયસ્તવ સુપ્રભાતમ્ ॥ ૫॥

નિષ્કામલોભમદમત્સરમાનસસ્ય
સત્ શિક્ષણાર્થકૃતદારપરિગ્રહસ્ય ।
વૈતૃષ્ણ્ય વિસ્મૃત વિવાહકથસ્ય સાધોઃ
શ્રીશારદામણિપતેસ્તવ સુપ્રભાતમ્ ॥ ૬॥

સર્વાઙ્ગદાહશમનાર્થ મુદપ્લુતસ્ય
શ્રીભૈરવી વિહિત ભેષજ નિર્વૃતસ્ય ।
તન્ત્રોક્તસાધન સહસ્રનિષેવકસ્ય
સર્વેષુ સિદ્ધિમયતસ્તવ સુપ્રભાતમ્ ॥ ૭॥

સ્વસ્યાઙ્ગતઃ સુકૃતપાતકરૂપ પુંસો-
નિર્વાણમુત્કટપરસ્પરમલ્લયુદ્ધમ્ ।
પુણ્યેન પાપહનનં ચ નિશામ્ય સાક્ષા-
ચ્છાન્તજ્વરસ્ય સુખિનસ્તવ સુપ્રભાતમ્ ॥ ૮॥

સ્વર્ણે તૃણે મલયતે વિષતુલ્યદૃષ્ટે-
ર્જીવે શવે નૃષુ મૃગેષુ સમાનબુદ્ધેઃ ।
ભિક્ષૌ ગૃહિણ્ય વિષમં પ્રસમીક્ષ્યમાણ
સ્યાન્તર્બહિઃ સમદૃશસ્તવ સુપ્રભાતમ્ ॥ ૯॥

ભોગેષુ યોગવિભવેષુ વિરાગશાલિન્
ક્ષેત્રેષુ વેશભવનેષુ પરાર્થદર્શિન્ ।
શિષ્ટેષુ દુષ્ટનિકરેષુ કૃપાભિવર્ષિણ
ત્રૈલોક્યપાવનયશસ્તવ સુપ્રભાતમ્ ॥ ૧૦॥

અન્તર્બહિશ્ચ ભુવનત્રિતયં સમસ્તં
સર્વેશ્વરસ્ય મહસાતિમિતં તતં ચ ।
આલક્ષ્ય હર્ષજવધર્ષિત માનસસ્ય
મત્તપ્રણર્તન કૃતસ્તવ સુપ્રભાતમ્ ॥ ૧૧॥

આલોક્ય લોકજનની પ્રતિમાન્ પ્રદીપા-
નારાધનોપકરણાનિ સમર્ચકાંશ્ચ ।
દેવાલયં ચ સકલાનિ ચિદાત્મકાનિ
વિશ્વક્સુમાનિકિરતસ્તવ સુપ્રભાતમ્ ॥ ૧૨॥

રાધાપ્રવિષ્ટહૃદયસ્ય, તદાત્મકસ્ય
માધુર્યભાવમધુપાન મદોત્કટસ્ય ।
પ્રેયાવિયોગદ્રવતપ્તકલેવરસ્ય
નિર્જીવસામ્યમયતસ્તવ સુપ્રભાતમ્ ॥ ૧૩॥

ગોપાલનન્દનનિરીક્ષણવિજ્વરસ્ય

તન્નિત્યયોગપરમોત્સવનિર્વૃતસ્ય ।
સર્વત્રતત્તનુવિલોકનવિસ્મિતસ્ય
તત્સાત્મતાઙ્ગતવતસ્તવ સુપ્રભાતમ્ ॥ ૧૪॥

ભક્તોત્તમો મહિત ભાગવતં પુરાણં
તત્સંશ્રયશ્ચ ભગવાનિતિ કીર્તિતસ્ય ।
વસ્તુત્રયૈક્ય પરમૈક્ય મહારહસ્યં
સાક્ષાદ્વિલોકિતવતસ્તવ સુપ્રભાતમ્ ॥ ૧૫॥

અન્યાદૃશાત્મતપસામનુભાવહેતો-
રેકૈક રોમવિવરાત્ સ્વતનોર્ગલન્તીમ્ ।
આલોક્ય કાન્તિમભિનન્દિતુમક્ષમસ્ય
તન્નષ્ટયેસ્પૃહયતસ્તવ સુપ્રભાતમ્ ॥ ૧૬॥

અસ્તેયસત્યકરુણાદિયમૈર્યુતસ્ય
કાર્ત્સ્ર્નેન સાધનચતુષ્ટય પુષ્કલસ્ય ।
અજ્ઞાનતોઽપિ કનકાદિસમસ્તલોહ-
સ્પર્શાક્ષમસ્ય ભગવન્સ્તવ સુપ્રભાતમ્ ॥ ૧૭॥

પૂગાદિયત્ કિમપિ વસ્તુકરારવિન્દે
સઙ્ગૃહ્યતે યદિ કદાપિ નિજોપયુક્ત્યૈ ।
તર્હ્યજસા કુરૂટતામતિમૂઢ઼તાં ચ
સમ્પ્રાપ્ય કશ્મલભુજસ્તવ સુપ્રભાતમ્ ॥ ૧૮॥

સન્તાડ઼નસ્ય પરકાયનિપાતિતસ્ય
સુસ્પષ્ટચિહ્નમખિલાત્મતયા સ્વદેહે ।
સઙ્ક્રાન્તમદ્ભુતવિમોહિત માનુષાણાં
નેત્રસ્ય ગોચરયતસ્તવ સુપ્રભાતમ્ ॥ ૧૯॥

તોતાપુરીચરણભક્ત, તતોગૃહીત
સંન્યાસદીક્ષ વિદિતસ્વપરાત્મભાવ ।
માસાન્ ષડુજ્ઝિત વિકલ્પમહાસમાધૌ
નિર્મજ્ય સંસ્થિત વિભો, તવ સુપ્રભાતમ્ ॥ ૨૦॥

આચારપૂતકરણસ્ય શુભાશયસ્ય
બધ્દાસનસ્ય વિજિતાનિલપઞ્ચકસ્ય ।
પ્રત્યાહૃતેન્દ્રિયગણસ્ય, સમાહિતસ્ય

બ્રહ્મામૃતં રસયતસ્તવ સુપ્રભાતમ્ ॥ ૨૧॥

સ્વેચ્છાગૃહીત મધુરપ્રમદામયસ્ય
વર્ષાર્ધભુક્તબહુદુઃસહયાતનસ્ય ।
ઇત્થં શનૈર્જડ઼સમાધિ સમુત્થિતસ્ય,
સ્થાનત્રયં ગતવતસ્તવ સુપ્રભાતમ્ ॥ ૨૨॥

ઇસ્લામતોત્સુક મોહમ્મદમૂર્તિદર્શિન્
ઈશોર્નિરીક્ષક, વિલોકિત ગૌર કૃષ્ણ ।
તેષામશેષવપુષાં સ્વતનોઃ પ્રવેશં
નિવર્ણ્ય વિસ્મિતમતે, તવ સુપ્રભાતમ્ ॥ ૨૩॥

સાક્ષાત્કૃતેશગિરિજાચ્યુતરામરાધા
સીતાઞ્જનેયનવિકૃસ્તુશચીતનૂજ ।
અન્યૈરદૃષ્ટચરયોગરહસ્યવેદિન્
સદ્ગુણ સર્વસરણે તવ સુપ્રભાતમ્ ॥ ૨૪॥

ત્યક્ત્વા વિકલ્પરહિતાં જડ઼યોગનિદ્રા-
મમ્બાજ્ઞયા કુશલભાવમુખસ્થિતસ્ય ।
લોકં મહેશ્વરમપિ સ્ફુટમેકકાલે
સમ્પશ્યતોઽખિલ ગુરોસ્તવ સુપ્રભાતમ્ ॥ ૨૫॥

લીલાસહાયવિરહવ્યથિતાન્તરઙ્ગ
તેષામુપાગમનદર્શનસુપ્રસન્ન ।
તેષાં પુરઃ પ્રકટિતાત્મમહાપ્રભાવ
સ્વામિન્ જગત્રયગુરો, તવ સુપ્રભાતમ્ ॥ ૨૬॥

સચ્ચિન્મૂર્તે ધૃતનરતનોર્લીલયા ધર્મગુપ્ત્યૈ
કૃત્વા દીર્ઘં બહુવિધતપાં સ્યેષુસમ્પ્રાપ્યસિદ્ધિઃ ।
નિક્ષિપ્યાન્તે સ્વયમુપચિતં જ્ઞાનવિત્તં સ્વશિષ્યે,
ષ્વન્તર્ધાતું વ્યવસિતમતેરસ્તુ તે સુપ્રભાતમ્ ॥ ૨૭॥

સચ્ચિત્સૌખ્યેકમૂર્તે નિજમહિમરતેર્ભૂરિકારુણ્યરાશે-
ર્વિપ્રાગ્ર્યાલ્લબ્ધજાતેર્બહુવિધતપસિ વ્યાપૃતસ્વાન્તવૃત્તેઃ ।
પ્રાપ્તબ્રહ્માનુભૂતેઃ સહચરનિહિત સ્વીયતેજોવિભૂતે-
રાનાકવ્યાપિકીર્તેરખિલજનપતેરસ્તુ તે સુપ્રભાતમ્ ॥ ૨૮॥

ઇતિ ઓટ્ટુરૌન્નિનમ્મૂતિરિપ્પાદ વિરચિતં
“શ્રીરામકૃષ્ણસુપ્રભાતગીતમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Ramakrishna Suprabhatam*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*